**अपाकीर्ण** *a.* Rejected, discarded; कुन्त्या त्वहमपाकीर्णो यथा न कुशलं तथा Mb. 5. 141. 4.

**अपाक्ष** *a.* [अपनतः अक्षमिन्द्रियम्] 1 Present, perceptible. -2 [अपगते अपकृष्टे वा अक्षिणी यस्य] Eyeless; having bad eyes.

**अपाङ्क्त,-पाङ्क्तेय,-पाङ्क्त्य** *a.* 'Not in the same row or line'; especially one who is not allowed by his caste-men to sit in the same row with them at meals; degraded, excommunicated, excluded from or inadmissible into society, an outcast; °उपहत defiled by the presence of excommunicated or impious persons. एतान्विगर्हिताचारानपाङ्क्तेयान्द्विजाधमान् (विवर्जयेत्) Ms. 3. 167.

**अपाङ्ग-ङ्गक** *a.* [अपगतम् अङ्गं यस्य] 1 Wanting or deformed in some limb of the body. -2 Maimed, crippled **-ङ्गः-ङ्गकः** [अपाङ्गति तिर्यक् चलति नेत्रं यत्र, अप-अङ्ग-घञ्] 1 The outer corner or angle of the eye; चलापाङ्गां दृष्टिम् S. 1. 24; अम्महे अपाङ्गकः स्फुरति किमपि वामकः M. 2. 4. -2 A sectarial mark on the forehead. -3 Cupid, the god of love. -4 N. of a plant (अपामार्ग – Mar. आघाडा.) &c. अपाङ्गौ नेत्रयोरन्ते तिलकाङ्गविहीनयोः Nm. -5 End; अथेमां सागरापाङ्गीं गाम् (अध्यतिष्ठत्) Mb. 1. 64. 13. **-Comp. -दर्शनम्, -दृष्टिः** *f.* **-विलोकितम्, -वीक्षणम्** &c. a side-glance, side-long look, wink. **-देशः** the place of the corner of the eye; the corner itself. **-नेत्र** *a.* (said of a lady) having eyes with beautiful (or long) outer corners; यदियं पुनरप्यपाङ्गनेत्रा परिवृत्तार्धमुखी मयाद्य दृष्टा V. 1. 19. (a better interpretation would however be 'with the eyes turned towards the corners' अपाङ्गयोः प्रेरिते नेत्रे यया *i. e.* casting side-long looks.)

**अपाच्, अपाञ्च्,** (*m* ङ्, *f.* ची, *n* क्) [अपाञ्चति, अञ्च् क्विप्] 1 Going or situated backwards, behind. -2 Not open or clear (अप्रकाश). -3 Western. -4 Southern (opp. उदञ्च्); probably for अवाञ्च्. **-क्** *ind.* 1 Behind, backwards. -2 Westward or southward.

**अपाची** The south or west; cf. Śiva. B. 4. 64 and 5. 29. °इतरा the north (other than south).

**अपाचीन** *a.* [अपाच्यां भवः ख] 1 Situated backwards or behind, turned backwards. -2 Not visible, imperceptible; यो अपाचीने तमसि मदन्तीःप्राचीश्चकार नृतमः शचीभिः Rv. 7. 6. 4. -3 Southern. -4 Western. -5 Opposite.

**अपाच्य** *a.* [अपाच्-यत्] Western or southern.

**अपाटव** *a.* Unskilful. **-वम्** 1 Unskilfulness, -2 Sickness, illness.

**अपाठ्य** *a.* Illegible.

**अपाणिग्रहणम्** Celibacy.

**अपाणिनीय** *a.* 1 Not taught by Pāṇini in his works (as a rule &c.). -2 (पाणिनीयं अष्टाध्यायीरूपं ग्रन्थं यो नाधीते) One who does not (properly) study Pāṇini's grammar; *i. e.* a superficial scholar, smatterer of Sanskrit.

**अपात्रम्** 1 A worthless vessel or utensil. -2 (fig). An unworthy or undeserving person, unfit receptacle or recipient. -3 One unfit or disqualified to receive gifts; अदेशकाले यद्दानमपात्रेभ्यश्च दीयते Bg. 17. 22; Ks. 24. 26. **-Comp. -कृत्या, अपात्रीकरणम्** doing degrading or unworthy acts; disqualification, any action which makes a man unworthy; four disqualifications for a Brāhmaṇa are mentioned in Ms. 11. 70. -निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥; see also संकरापात्रकृत्यासु मासं शोधनमैन्दवम् 11. 125. **-दायिन्** *a.* giving to unworthy persons. **-भृत्** *a.* supporting the unworthy or worthless; प्रायेणापात्रभृद्भवति राजा Pt. 1.

**अपाद** = अपद् q. v.

**अपादा** 3 A. To take off or away, to remove; तत्पाप्मानमपादत्ते; मृत्पिण्डमपादाय महावीरं करोति Śat. Br.

**अपादानम्** 1 Taking away, removal; ablation; a thing from which another is removed. -2 (in gram.) The sense of the ablative case; ध्रुवमपायेऽपादानम् P. I. 4. 24; अपादाने पञ्चमी II. 3. 28; अपाये यदुदासीनं चलं वा यदि वाऽचलम्। ध्रुवमेव तदावेशात्तदपादानमुच्यते ॥ Hari.; अपादान is of three kinds:-निर्दिष्टविषयं किंचिदुपात्तविषयं तथा। अपेक्षितक्रियं चेति त्रिधापादानमिष्यते ॥ *e. g.* वृक्षात् पत्रं पतति, मेघाद्विद्योतते विद्युत्, & कुतो भवान्.

**अपात्त** *a.* acquired, Bṛi. Ār. Up.

**अपाध्वन्** *n.* A bad way; P. VI. 2. 187.

**अपान्** 2 P. [अप-अन्] 1 To breathe out. respire; यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः Ch. Up. -2 To expire.

**अपानः** Breathing out, respiration (opp. प्राण); प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ Bg. 5. 27; one of the five life-winds in the body which goes downwards and out at the anus (अपनयनान्मूत्रपुरीषादेरपानोऽधोवृत्तिर्वायुर्नाभिस्थानः) मूत्रशुक्रवहो वायुरपान इति कीर्त्यते. **-नः, -नम्** The anus (आधारे घञ्). **-Comp. -दा** giving Apāna. Vāj. 17. 15. **-द्वारम्** the anus. **-पवनः, -वायुः** 1 the life-wind called अपान. -2 ventris crepitus. **-भृत्** *f.* a sort of brick (cherishing the life-wind अपान).

**अपाननम्** 1 Respiration. -2 Taking downwards, urine, excrement &c.

**अपानृत** *a.* Free from falsehood, true. अपानृतकथं पुत्र पितरं कर्तुमिच्छसि Rām. 2. 34. 38.

**अपान्तरतमा** *m.* The name of an ancient sage or of Vyāsa in his previous birth. सरस्वतीमुच्चचार तत्र सारस्वतोऽभवत्। अपान्तरतमा नाम सुतो वाक्संभवः प्रभुः ॥ Mb. 12. 349. 39.

**अपाप-पिन्** *a.* Sinless, guiltless, pure, virtuous; अपापानां कुले जाते मयि पापं न विद्यते। यदि संभाव्यते पापमपापेन च किं मया ॥ Mk. 9. 37. **-Comp. -काशिन्** *a.* 1 not ill-looking. -2 not revealing evil. **-वस्यसम्** Ved. wellbeing, welfare, sound health, prosperity. **-विद्ध** *a.* Not afflicted with evil; शुद्धमपापविद्धम् (ब्रह्मन्) Vāj. 40. 8.